श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीनारायणयतीन्द्रमहादेशिकैरनुगृहीतं

॥ श्री कृष्ण मङ्गळाशासनम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री कृष्ण मङ्गळाशासनम् ॥

गीतोपनिषदाचार्ये मम यामुनदेशिके।
यतीन्द्रे चागमान्तार्ये भक्तिर्भद्राय वर्धताम् ॥ 1 ॥

सच्छिष्याद्युपदेश्याय देहात्मभ्रमघातिने।
आदिष्टकर्मयोगाय गीताचार्याय मङ्गळम् ॥ 2 ॥

उक्त सर्वात्मसाम्याय जीव योग विधायिने।
साक्षिणे ज्ञानिनि श्रेष्ठक्रियावेद्याय मङ्गळम् ॥ 3 ॥

साङ्गभक्ति समादेष्ट्रे निस्सीमगुण भूतये।
सुचक्षुर्दानदक्षाय क्रमोपास्याय मङ्गळम् ॥ 4 ॥

गीतक्षेत्रज्ञतत्त्वाय त्रिगुणद्रव्यवादिने।
चेतनाचेतनेशाय शास्त्रवेद्याय मङ्गळम् ॥ 5 ॥

त्रेधाविभक्त धर्माय सारोपायप्रदर्शिने।
भक्तिप्रपत्तिलभ्याय गीताचार्याय मङ्गळम् ॥ 6 ॥

नारायणेन मुनिना कृतं गीतार्य मङ्गळम्।
आशास्तेऽनुदिनं सोऽपि भवेन्मङ्गळभाजनम् ॥ 7 ॥

॥ इति श्री कृष्ण मङ्गळाशासनं समाप्तम् ॥